# SvatmasakShatkara

# સ્વાત્મસાક્ષાત્કારઃ

## Document Information

Text title : Svatmasakshatkara

File name : svatmasakshatkara.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Traditional

Transliterated by : Sunder Hattangadi

Description-comments : Sarvajnanottara Agama http://shodhganga.inflibnet.ac.in/handle/10603/1354

Latest update : April 21, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સ્વાત્મસાક્ષાત્કારઃ

॥ સ્વાત્મસાક્ષાત્કારોપદેશપ્રકરણમ્  ॥

(સર્વજ્ઞાનોત્તરવૃત્તૌ)

અથાન્યં સમ્પ્રવક્ષ્યામિ ઉપાયં તત્ત્વતો ગુહ ।
અગ્રાહ્યસ્યાપિ સૂક્ષ્મસ્ય સર્વગસ્ય તુ નિષ્કલમ્ ॥ ૧॥

યેન વિજ્ઞાયતે સમ્યક્ યં જ્ઞાત્વા તુ શિવો ભવેત્ ।
ન કસ્ય ચિન્મયાખ્યાતં તદ્વિજ્ઞાનં શ્રુણુષ્વ મે ॥ ૨॥

ગુરુપારમ્પરાયાતમદૃષ્ટં સર્વાદિભિઃ ।
ભવબન્ધવિમોક્ષાર્થં પરમં સર્વતોમુખમ્ ॥ ૩॥

યોઽસૌ સર્વગતો દેવઃ સર્વાત્મા સર્વતોમુખઃ ।
સર્વતત્ત્વમયોઽચિન્ત્યઃ સર્વસ્યોપરિ સંસ્થિતઃ ॥ ૪॥

સર્વતત્ત્વવ્યતીતશ્ચ વાઙ્મનોનામવર્જિતઃ ।
સોઽહમેવમુપાસીત નિર્વિકલ્પેન ચેતસા ॥ ૫॥

યદેવ નિષ્કલં જ્ઞાનં શાશ્વતં ધ્રુવમવ્યયમ્ ।
નિર્વિકલ્પમનિર્દેશ્યં હેતુદૃષ્ટાન્તવર્જિતમ્ ॥ ૬॥

અલિઙ્ગમક્ષરં શાન્તં વિષયાતીતગોચરમ્ ।
અવિર્ભાવ્યમસન્દેહં તદહં નાત્ર સંશયઃ ॥ ૭॥

અહમેવ પરો દેવઃ સર્વમન્ત્રમયઃ શિવઃ ।
સર્વમન્ત્રવ્યતીતશ્ચ સૃષ્ટિસંહારવર્જિતઃ ॥ ૮॥

મયા વ્યાપ્તમિદં સર્વં દૃશ્યાદૃશ્યં ચરાચરમ્ ।
અહમેવ જગન્નાથો મત્તઃ સર્વં પ્રકાશતે ॥ ૯॥

અનેકાકારસંભિન્નં વિશ્વં ભુવનસઞ્ચયમ્ ।
શિવાદ્યવનિપર્યન્તં તત્સર્વં મયિ સંસ્થિતમ્ ॥ ૧૦॥

યચ્ચકિઞ્ચિજ્જગત્યસ્મિન્ દૃશ્યતે શ્રૂયતેઽપિ વા ।
બહિરન્તર્વિભાગેન તત્સર્વં વ્યાપિતં મયા ॥ ૧૧॥

અહમાત્મા શિવોહ્યન્યઃ પરમાત્મેતિ યઃ સ્મૃતઃ ।
એવમુપાસયેન્મોહાન્ન શિવત્વમાપ્નુયાત્ ॥ ૧૨॥

શિવોઽન્યસ્ત્વહમેવાન્યઃ પૃથગ્ભાવં વિવર્જયેત્ ।
યશ્શિવઃ સોઽહમેવેતિ અદ્વૈતં ભાવયેત્સદા ॥ ૧૩॥

અદ્વૈતભાવનાયુક્તઃ સર્વત્રાત્મનિ સંસ્થિતઃ ।
સર્વગં સર્વદેહસ્થં પશ્યતે નાત્ર સંશયઃ ॥ ૧૪॥

એવમેકાત્મભાવેન સંસ્થિતસ્ય તુ યોગિનઃ ।
સર્વજ્ઞત્વં પ્રવર્તેત વિકલ્પરહિતસ્ય ચ ॥ ૧૫॥

યોઽસૌ સર્વેષુ શાસ્ત્રેષુ પઠ્યતે હ્યજ ઈશ્વરઃ ।
અકાયો નિર્ગુણો હ્યાત્મા સોઽહમસ્મિ ન સંશયઃ ॥ ૧૬॥

અવિજ્ઞાતઃ પશુઃ સો હિ સૃષ્ટિધર્મસમાશ્રિતઃ ।
વિજ્ઞાતઃ શાશ્વતઃ શુદ્ધઃ સ શિવો નાત્ર સંશયઃ ॥ ૧૭॥

તસ્માદાત્મા સદા વેદ્યઃ સુવિચાર્યઃ વિચક્ષણૈઃ ।
પરાપરવિભાગેન સ્થૂલસૂક્ષ્મવિભાગશઃ ॥ ૧૮॥

પરઃ પરમનિર્વાણ અપરઃ સૃષ્ટિભેદતઃ ।
સ્થૂલો મન્ત્રમયઃ પ્રોક્તઃ સૂક્ષ્મો ધ્યાનૈકસંસ્થિતઃ ॥ ૧૯॥

અથવા બહુશોઽનેન કિમુક્તેન ષડાનન ।
વાગ્વિકલ્પવિશેષેણ મનઃ સંમોહકારિણા ॥ ૨૦॥

સર્વે ધર્માત્મનઃ સન્તિ યદ્યેવં પરિકલ્પયેત્ ।
તત્તદ્ભવત્યસન્દેહાત્ સદા તદ્ભાવભાવતઃ ॥ ૨૧॥

ઇત્યેવમાત્મવિજ્ઞાનં કથિતં તુ સમાસતઃ ।
જ્ઞાત્વૈવાત્મમયં સર્વમાત્માનં પર્યુપાસયેત્ ॥ ૨૨॥

ન તત્ર દેવા વેદા વા યજ્ઞા વા બહુદક્ષિણાઃ ।
આત્મવિજ્ઞાનમાશ્રિત્ય વિમલં સર્વતોમુખમ્ ॥ ૨૩॥

સંસારાર્ણવમગ્નાનાં ભૂતાનાં શરણાર્થિનામ્ ।
નાન્યઃ શરણદઃ કશ્ચિદાત્મજ્ઞાનાદૃતેઃ ક્વચિત્ ॥ ૨૪॥

આત્માનં પરમો ભૂત્વા યો વિજાનાતિ તત્ત્વતઃ ।
સ મુચ્યતે ત્વયત્નેન સર્વાવસ્થાં ગતોऽપિ સન્ ॥ ૨૫॥

આત્મલાભાત્પરોલાભઃ ક્વચિદન્યો ન વિદ્યતે ।
તદાત્માનમુપાસીત યોऽયમાત્મા પરસ્તુ સઃ ॥ ૨૬॥

ન પ્રાણો નૈવ ચાપાનો વિશિષ્ટકરણસ્તથા ।
સર્વજ્ઞં તુ તમાત્માનં પરિપૂર્ણં સદા સ્મરેત્ ॥ ૨૭॥

ન ચૈવાભ્યન્તરે બાહ્યે નાતિદૂરે સમીપતઃ ।
સ નિષ્કલે પરે સ્થાને તત્ર ચિત્તં નિવેશયેત્ ॥ ૨૮॥

તિર્યગૂર્ધ્વમધશ્ચૈવ બહિરન્તશ્ચ નિત્યશઃ ।
સર્વશૂન્યં તમાભાસમાત્માનં ભાવયેત્સદા ॥ ૨૯॥

નૈવ શૂન્યં ન ચાશૂન્યમશૂન્યં શૂન્યમેવ ચ ।
પક્ષપાતવિનિર્મુક્તમાત્માનં પર્યુપાસયેત્ ॥ ૩૦॥

નિરામયં નિરાધારં વર્ણરૂપવિવર્જિતમ્ ।
નિરઞ્જનં ગુણાતીતમાત્માનં પર્યુપાસયેત્ ॥ ૩૧॥

નિરાશ્રયં નિરાલમ્બમપ્રમેયમનૂપમમ્ ।
સ્વભાવવિમલં નિત્યમાત્માનં પર્યુપાસયેત્ ॥ ૩૨॥

સંન્યસ્ય સર્વકર્માણિ નિઃસ્પૃહઃ સઙ્ગવર્જિતઃ ।
ભાવયેદાત્મનાત્માનમાત્મન્યેવાત્મનિ સ્થિતમ્ ॥ ૩૩॥

સ દેશજાતિસમ્બન્ધાન્વર્ણાશ્રમસમન્વિતાન્ ।
ભાવાનેતાન્ પરિત્યજ્ય સ્વરૂપં ભાવયેદ્બુધઃ ॥ ૩૪॥

મન્ત્રોऽયં દેવતા હ્યેષા ઇદં ધ્યાનમિદં તપઃ ।
સર્વભાવાન્ પરિત્યજ્ય હ્યાત્મભાવં તુ ભાવયેત્ ॥ ૩૫॥

અભાવે ભાવમાશ્રિત્ય ભાવં કુર્યાન્નિરાશ્રયમ્ ।
આત્મસંસ્થં મનઃ કૃત્વા ન કિઞ્ચિદપિ ચિન્તયેત્ ॥ ૩૬॥

નૈવ ચિન્ત્યં ન ચાચિન્ત્યં ન ચિન્ત્યં ચિન્ત્યમેવ ચ ।
પક્ષપાતવિનિર્મુક્તમાત્માનં પર્યુપાસયેત્ ॥ ૩૭॥

અચિન્ત્યં ચિન્તયેન્નિત્યં કૃત્વા ચિત્તં નિરાશ્રયમ્ ।

નિસ્તત્ત્વે નિષ્કલી ભૂતે વિન્દત્યાત્મનિ યત્સુખમ્ ॥ ૩૮॥

નિર્વિકલ્પમચિન્ત્યં ચ હેતુદૃષ્ટાન્તવર્જિતમ્ ।
તત્સુખં પરમં પ્રોક્તમાત્યન્તિકમનૌપમમ્ ॥ ૩૯॥

નિરસ્યવિષયાસઙ્ગં મનોવૃત્તિં વિવર્જયેત્ ।
યદા યાત્યુન્મની ભાવં તદા તત્પરમં સુખમ્ ॥ ૪૦॥

સર્વદિગ્દેશકાલેષુ યોગાભ્યાસો વિધીયતે ।
સર્વવર્ણાશ્રમાણાં ચ જ્ઞાનભેદો ન વિદ્યતે ॥ ૪૧॥

ગવામનેકવર્ણાનાં ક્ષીરસ્યાપ્યેકવર્ણતા ।
ક્ષીરવત્પશ્યતે જ્ઞાનમલિઙ્ગવસ્તુ ગવાં સમાઃ ॥ ૪૨॥

યસ્માત્સર્વગતં બ્રહ્મ વ્યાપકં સર્વતોમુખમ્।
તસ્માદ્બ્રહ્મણિ સંસ્થાને દિગ્દેશાન્ન વિચારયેત્ ॥ ૪૩॥

નૈવ તસ્ય કૃતેનાર્થો ન કાર્યો ન વિધિઃ સ્મૃતઃ ।
ન લિઙ્ગં નાશ્રમાચારઃ પરમાત્મનિ સંસ્થિતઃ ॥ ૪૪॥

ગચ્છન્ તિષ્ઠન્ સ્વપન્ જાગ્રન્ ભુઞ્જાનોઽપિ પિબન્નપિ ।
સર્વદા સર્વકાલેષુ વાતશીતાતપેષુ ચ॥ ૪૫॥

ભયદારિદ્ર્યરોગેષુ મન્દ્યવિજ્વરકાદિષુ ।
આત્મન્યવસ્થિતઃ શાન્ત આત્મતૃપ્તસ્તુ નિષ્કલઃ ॥ ૪૬॥

નાગતોઽહં ગતો વાપિ નાગમિષ્યેન ગચ્છતા ।
ન ભૂતો ન ભવિષ્યામિ પ્રકૃત્યસ્થિરધર્મણી ॥ ૪૭॥

પ્રાકૃતાનિ તુ કર્માણિ પ્રકૃતિઃ કર્મસમ્ભવા ।
નાહં કિઞ્ચિત્કરોમીતિ યુક્તં મન્યેત તત્ત્વવિત્ ॥ ૪૮॥

નૈવ પ્રકૃતિબન્ધોઽસ્તિ મુક્ત ઇત્યભિધીયતે ।
ન ચૈવ પ્રાકૃતૈર્દોષૈર્લિપ્યતે તુ કદાચન ॥ ૪૯॥

નિર્નાશ્ય તમસોરૂપં દીપો યદ્વત્ પ્રકાશતે ।
આભાત્યેવં પરો હ્યાત્મા ત્યક્ત્વા અજ્ઞાનજં તમઃ ॥ ૫૦॥

સ્નેહક્ષયાદ્યથા દીપો બલાન્નિર્વાણમિચ્છતિ ।
તથાત્મભાવનાયુક્તઃ સ્વાત્મન્યેવાવતિષ્ઠતે ॥ ૫૧॥

ઘટસંવૃતમાકાશં નીયમાને યથા ઘટે ।
ઘટો નયતિ નાકાશં તદ્વજ્જીવો નભોપમઃ ॥ ૫૨॥

ભિન્ને કુમ્ભે યથાકાશમાકાશત્વં પ્રતિપદ્યતે ।
વિભિન્ને પ્રાકૃતે દેહે તથાત્મા પરમાત્મનિ ॥ ૫૩॥

ઇત્યેવમધિકારેણ સર્વજ્ઞેનાધિકારિણા ।
સર્વબન્ધાદ્વિનિર્મુક્તઃ સર્વજ્ઞઃ સર્વગો ભવેત્ ॥ ૫૪॥

તદાગમાન્ પરિહૃત્ય સર્વાન્
    શુદ્ધં ગૃહીત્વાત્મસમાધિયોગમ્ ।
અસ્માત્પરં નાન્યદિહાસ્તિ કિઞ્ચિત્
    જ્ઞાત્વૈવ સન્ત્યજ્ય મનોવિકલ્પમ્ ॥ ૫૫॥

વિજ્ઞાનમેવં સમુપાસ્ય વિદ્વાન્
    વિશત્યકામં સતતં નિયુક્તઃ ।
સર્વત્રગામી ભવતીહ મુક્તઃ
    તદ્ધર્મધર્મી બહિરન્તઃસંસ્થઃ ॥ ૫૬॥

સર્વજ્ઞતાતૃપ્તિરનાદિબોધઃ
    સ્વતન્ત્રતા નિત્યમલુપ્તશક્તિઃ ।
અનન્તશક્તિશ્ચ નિરામયાત્મા
    વિશુદ્ધદેહઃ સ શિવત્વમેતિ ॥ ૫૭॥

ન દીક્ષા ન તુ સંસ્કારો ન મુદ્રા ન ચ મણ્ડલમ્ ।
ન જપો નાર્ચનં સ્નાનં ન હોમો નૈવસાધનમ્ ॥ ૫૮॥

ધર્માધર્મફલૌ ન સ્તઃ નૈવ પિણ્ડોદકક્રિયા ।
નિયમાદિ ન તસ્યાસ્તિ નોપવાસો વિધીયતે ॥ ૫૯॥

પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ બ્રહ્મચર્યવ્રતાનિ ચ ।
અગ્નિપ્રવેશનં નાસ્તિ પતનં ભૃગુનોદકે ॥ ૬૦॥

શિવજ્ઞાનામૃતં પીત્વા વિચરસ્વ યથા સુખમ્ ।
શિવવચ્છાશ્વતઃ શુદ્ધઃ સૃષ્ટિધર્મવિવર્જિતઃ ॥ ૬૧॥

સત્યં સત્યં પુનઃ સત્યં ત્રિસત્યં સમયઃ કૃતઃ ।
અતઃ પરતરં નાસ્તિ વિજ્ઞેયં કુત્રચિત્ ગુહ ॥ ૬૨॥

ઇતિ શ્રીમત્સર્વજ્ઞાનોત્તરે સ્વાત્મસાક્ષાત્કારોપદેશપ્રકરણમ્ ॥

પાઠભેદ: પાઠભેદાઃ -
ન જપો નાર્ચનં સ્નાનં ન હોમો નૈવ સાધનમ્ ।
ધર્માધર્મફલં નાસ્તિ ન પિણ્ડોદકક્રિયા ॥ ૫૮॥

નિયમાનિ ન તસ્યાસ્તિ નોપવાસો વિધીયતે ।
પ્રવૃત્તિં ન નિવૃત્તિશ્ચ બ્રહ્મચર્યવ્રતાનિ ચ ॥ ૫૯॥

અગ્નિઃ પ્રવેશનં નાસ્તિ પતનં ભૃગુનોદકે ।
શિવજ્ઞાનામૃતં પીત્વા વિચરસ્વ યથાસુખમ્ ॥ ૬૦॥

શિવવચ્છાશ્વતઃ શુદ્ધઃ સૃષ્ટિધર્મવિવર્જિતઃ ।
સત્યં સત્યં પુનઃ સત્યં ત્રિસત્યં સ્મયઃ કૃતઃ ॥ ૬૧॥

અતઃ પરતરં નાસ્તિ વિજ્ઞેયં કુત્રચિદ્બુહ ।
વિમલયતિ સર્વભાવાન્ વિમલાત્મા વિમલબુદ્ધિ દૃઢધીઃ ॥ ૬૨॥

સર્વં વિમલં પશ્યતિ વિમલો વિમલેન ભાવેન ।
જાગ્ર જાગ્ર જાગ્ર સ્વપ્નં તથા જાગ્રસુષુપ્તિકમ્ ॥ ૬૩॥

જાગ્ર તુર્યં કાલપરમતીતં પરદર્શનમ્ ।
વિશ્વાગ્રસ્યે પ્રશાન્તશ્ચ શિવદર્શનમેવ ચ ॥ ૬૪॥

સાયુજ્યમિતિભેદેન ચોર્ધ્વમેકાદશસ્મૃતઃ ॥ ૬૫॥

From
http://shodhganga.inflibnet.ac.in/handle/10603/1354

Encoded and proofread by Sunder Hattangadi

*SvatmasakShatkara*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*